SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

# पैङ्गलोपनिषदि शङ्करदिशा केवलाद्वैतभावना- समीक्षणमेकम्

**Imrul Kayesh**
Ph.D Research Scholar
Raiganj University
Raiganj, West Bengal, India
Email: imrulkayesh3@gmail.com

**Abstract:** भारतीयज्ञानपरम्परा सर्वकाले सर्वदेशे सर्वजने विशेषमर्यादया समादृता दृश्यते। भारतीयज्ञानपरम्परायां चोपनिषदः सकलदर्शनशास्त्राणां दर्शनतत्त्वानामुपजीव्यत्वेन कल्पिताः भवन्ति। उपनिषदः धर्मस्य अर्थस्य कामस्य मोक्षस्य वा पुरुषार्थचतुष्टयस्य ज्ञानस्य च पराकाष्ठा इति वदन्ति। प्राचीनकालस्य ऋषीणां मुनीनामेका अनन्यासृष्टिः इयमुपनिषद्। उपनिषद्भावधारायां सत्यप्रेममङ्गलत्रयं समाहितं भवति। उपनिषत्सु सर्वत्र सत्यस्वरूपानन्दब्रह्मणः स्पर्शः अनुभूयते। अर्थात् वेदान्तदर्शने प्रतिपादितशङ्कराचार्यस्य जीवब्रह्मैक्यभावना उपनिषत्सु निहिता दृश्यते। वेदान्तदर्शनस्य एकमात्रं प्रधानतत्त्वन्तु ब्रह्मजीवयोः अभेदकल्पना इति। पैङ्गलोपनिषदि तद्भावना सरलभावेन आलोचितास्ति। केवलाद्वैतवादः अर्थात् केवलमद्वैतं न द्वैतमिति। ब्रह्मजीवयोः अभेदो हि केवलाद्वैतवादस्य मूलकथा। उपनिषत्साहित्ये बहुत्र ब्रह्मजीवयोः अभेदवर्णनास्ति। तत्तु संक्षेपेणात्र वर्णना करिष्यते।

**Keywords:** उपनिषत्, गौणोपनिषत्, पैङ्गलोपनिषत्, जीवः, ब्रह्म, अद्वैतभावना

**भूमिका—** भारतीयजनानां मध्ये प्राचीनकालादेव विविधविषयाणां सत्यानुसन्धानस्य उत्सूकता विराजिता दृश्यते। सुप्राचीनकाले मनुष्यसभ्यता यदा वर्तमानकालवत् नगरमुखीसभ्यता नासीत्तदा तस्मिन् काले स्निग्धशीतलतपोवने मनोमुग्धभावनया मुनयः ऋषयश्च जीवब्रह्मादिविषये नानाविषये सत्यानुसन्धाने निमग्नाः दरीदृश्यन्ते। ऋषीणामुपलब्धज्ञानं सञ्चितचरमसत्यं वा वेदे निहितमस्ति। वैदिकसाहित्यं संहिता-ब्राह्मण-आरण्यक्-उपनिषद्भेदेन चतुर्धा विभज्यते दृश्यते। संहिताभागे मन्त्रांशे वैदिकदेवतानां कृते स्तुतिवाक्यं श्रूयते। ब्राह्मणांशे यागयज्ञानां विधिविधानम्, उपासनापद्धतिः, साधनादिविषयाः संयुक्ताः भवन्ति। ब्राह्मणस्य द्रव्ययज्ञं हि आरण्यकभागे ज्ञानयज्ञे प्रतिपादितं दृश्यते। आरण्यके हि उपासना ज्ञानं तथा आध्यात्मविद्यायाः सूचनां परिलक्ष्यते। क्रान्तदर्शिनः तत्त्वदर्शिनश्च विजने स्निग्धशीतलविपिने मुमुक्षुशिष्यान् आध्यात्मविद्यायाः ज्ञानं स्म उपदिशन्ति। अर्थात् उपनिषत्काले हि दार्शनिकतत्त्वानां वीजमुप्यते। युगे युगे नाना उपनिषत्संरचिताः भवन्ति। अद्यावधि २०० संख्यकोपनिषदः रचिताः सन्ति। यद्यपि मुक्तिकोपनिषदि १०८ संख्योपनिषदामुल्लेखोऽस्ति। उपनिषदां सर्वासां प्रतिपाद्य विषयस्तु एक एव। उपनिषदां रचनाशैलीं परिलक्ष्य शङ्कराचार्येण कासाञ्चित् कासाञ्चित् मुख्योपनिषदां भाष्यं चकार। तस्मात् ताः मुख्योपनिषदः बहुल प्रचलिताः भवन्ति। उपनिषत्सु जीवब्रह्मविषये नाना चिन्तनं ऋषिभिः व्यक्तम्। पैङ्गलोपनिषदि तच्चिन्तं स्थले स्थले प्रतिफलितं दृश्यते। पैङ्गलोपनिषत्तु शुक्लयजुर्वेदीयगौणोपनिषत्सु एका अन्यतमा वेदान्तविषयी उपनिषत्। अत्र उपनिषदि पैङ्गलाख्येन ऋषिणा जीवस्य ब्रह्मणः वर्णनाद् परं तयोरैक्यं विदितमस्ति। अस्मिन् शोधपत्रे वेदान्तदर्शनदिशा शङ्करमतानुसारं जीवब्रह्मैक्यभावना प्रतिपादिता भवति। वेदान्तदर्शनस्य

बलिष्ठमतवादस्तु ब्रह्मसत्यं जगन्मिथ्या जीव ब्रह्मैव नापरः इति। अर्थात् ब्रह्मैव जीवः जीव एव ब्रह्म तयोः भेदः कदापि न विराजते। ब्रह्मसत्यमेकमेवाद्वितीयमिति। किन्तु वास्तवजीवने नाना अभिज्ञातायां दृश्यते यत् निर्गुणब्रह्म सगुणब्रह्मरूपेण बहुधा प्रतिभासते। तत्र अविद्या हि अज्ञानं माया वा तयोः भेदजनने मूलकारणं विद्यते। अघटनघटनापटीयसीमायाप्रभावे हि ब्रह्म जीवरूपेण प्रतिभासते। तथा ह्युच्यते- सर्वज्ञेशो मायालेशसमन्वितो व्यष्टिदेहं प्रविश्य तया मोहित जीवत्वमगमत्।[1] संसारे नित्यशुद्धमुक्तस्वभावेन विराजमानो जीवो हि मायावशात् मिथ्यास्वरूपेण तिष्ठति। तत्र जगदिदं सर्वं खलु मिथ्यास्वरूपमेव। तदुक्तं वेदान्तसारे- ब्रह्म एव नित्य वस्तु ततः अन्यदखिलमनित्यमिति।[2] एकस्मिन् वस्तुनि कथं प्रकारेण भेदः तिष्ठति। तत्र भेदस्तु केवलम् आरोपितभेदमात्रम्। अध्यात्मोपनिषदि च कथ्यते–

अतस्कल्पो विकल्पोऽयं विश्वमित्येकवस्तुनि।
निर्विकारे निराकारे निर्विशेषे भिदा कुतः।।[3]

ब्रह्म कुटस्थं नित्यं चेति। जीवः विनश्वरः क्षणिकः अनित्यश्चेति। ब्रह्म निर्गुणः निष्क्रियश्च। किन्तु जीवः सगुणः सक्रियश्चास्ति। ब्रह्म पारमार्थिकसत्ता। जीवस्तु व्यवहारिकसत्ता इति। ब्रह्मजीवद्वयोः तत्त्वयोः निरूपणं विविधया विविधाचार्यैः विविधसमये कृतमस्ति। केषाञ्चन विदग्धपण्डितानां मतानुसारं तत्त्वद्वयश्च सामान्यतया विराजमानः चैतन्यविम्बस्थानीयो वर्तते। अस्य प्रतिविम्बं हि विविधोपाधिमध्ये विम्बत्वात् विविधया ग्रहणं क्रियते। अन्ये विद्वांसः ब्रह्मचैतन्यं हि विम्बस्थाने कल्पते। अस्य प्रतिविम्बं हि जीव उच्यते। द्वयोः मतवादयोः पार्थक्यं केवलं किञ्चित् वर्तते यदा विम्बकारः स्वीक्रियते तदा ब्रह्म कथ्यते। किन्तु यदा प्रतिविम्बद्वारा आच्छादितोऽस्ति तदा जीवः कथ्यते। यथार्थतः चैतन्यं एक एव वर्तते। तस्मिन् विम्ब-प्रतिविम्बयोः कल्पना तु उपाधिजन्यमस्ति। तदुपाधिजन्यं हि ब्रह्मजीवयोः भेदः कल्पते। तदनुसारं हि ब्रह्म मुक्तः जीवस्तु बद्धश्चास्ति। ब्रह्म चातन्यं जीवः चैतन्यभासरूपः चेति। ब्रह्म निरूपाधिकः जीवः सोपाधिको वर्तते। ब्रह्म निर्विशेषः जीवः सविशेषः चेति। अनन्तकोटिकर्मवासनया वासितबुद्धौ अन्तःकरणे वा प्रतिफलितस्य चैतन्यस्य प्रतिविम्बं हि जीवः कथ्यते। केवलं प्रतिविम्बमात्रं हि जीवो नास्ति। यद्वत् घटाकाससहिताकाशस्य प्रतिविम्बं तु अलाकाश उच्यते तद्वत् कुटस्थसहितचिदाभासः जीव कथ्यते। अतः बुद्धिस्थचिदाभासः बुद्धेः अधिष्ठानं चैतन्यं अनयोः द्वयोः तत्त्वयोः मेलनं हि जीव उच्यते। केवलम् अन्तःकरणं हि जीव इति कथयितुं नोचितं भवति घटादिपदार्थानां जीवत्वमिति परिणत्वात्। किन्तु शङ्काराचार्यमतानुसारं ब्रह्मजीवयोः कोऽपि भेदो नास्ति। तयोः तत्त्वद्वयोः यः कश्चिद्भेदः सोऽपि व्यवहारिकोऽस्ति। शङ्कराचार्येण ब्रह्मजीवयोः अभेदतां वर्णने कथ्यते यत्- द्विरूपं हि ब्रह्मवगम्यते, नामरूपविकार भेदोपाधिः[4]। ब्रह्मजीवयोः भेदः अविद्याकारणात् मायाकारणाद्वा व्यवहारिकभेदः न तु पारमार्थिकभेदः। अत्मा अद्वैतः न तु द्वैतः इति। तदुक्तं शङ्कराचार्येण ब्रह्मसूत्रे शाङ्करभाष्ये— एको हि प्रत्यगात्मा भवति न द्वौ प्रत्यगात्मानौ संभवतः।[5] वस्तुतः ब्रह्मजीवयोः भेदः नाममात्रमेवास्ति। जीवः मिथ्याकल्पनाजन्यं स्वयमेव दुःखी मन्यते। तद्यथा— अतश्च विज्ञानात्मपरमात्मनोरविद्याप्रत्युपस्थापितनामरूपरचित देहाद्युपाधिनिमित्तो भेदो न पारमार्थिकः इति।[6] पैङ्गलेन ऋषिणा ब्रह्मजीवयोः अभेदतां प्रतिपाद्य कथितम्- तत्त्वमसि[7], अयमात्माब्रह्म[8], त्वं ब्रह्मासि[9], अहं ब्रह्मास्मि[10] इति। अविद्याजनिते कारणे हि ब्रह्म अन्तःकरणपरिच्छिन्नजीवः बहुधा प्रतिभासते इति पूर्वमेवोक्तम्। पैङ्गलोपनिषदि कथ्यते— एवान्तःकरणसम्भिन्नबोधः।[11] घटाकाश महाकाशः यथा एकानन्ताकाशस्य महाकाशस्य आंशिकप्रकाशमात्रं तथा हि जीव ब्रह्मणः आंशिकप्रकाशमात्रं वर्तते।

अन्तःकरणं मायासृष्टम् अविद्याजनितं वा विद्यते। मायातत्त्वमध्यात्मोपनिषदि च माया कथं प्राज्ञपुरुषं क्षणकालमात्रं स्वजाले आवृणोति तस्य वर्णलं क्रियते। तद्यथा—

यथाऽपकृष्टं शैवालं क्षणमात्रं न तिष्ठति।
आवृणोति तथा माया प्राज्ञं वाऽपि पराङ्मुखम्।।[12]

अत एव तत्त्वज्ञानद्वारा अविद्यानाशे अन्तःकरणरूपावच्छेदश्चापसृते सति जीवः तत्त्वमसीति[13] वेदान्तवाक्यानां निहितार्थमनुधायन् ब्रह्मस्वरूपतामुपलब्धिं करोति।पैङ्गलोपनिषदि च ऋषिणा प्रोक्तम्— परजीवोपाधिमायाविद्ये विहाय तत्त्वंपदलक्ष्यं प्रत्यगभिन्नं ब्रह्म।[14] पैङ्गलोपनिषदि च ब्रह्मजीवयोः अभेदतां प्रतिपाद्यते—

यथा जले जलं क्षिप्तं क्षीरे क्षीरं घृते घृतम्।
अविशेषे भवेत्तद्वज्जीवात्मपरमात्मनोः।।[15]

**उपसंहारः—** अत्र उपसंहारः कर्तुं शक्यते यत् पैङ्गलोपनिषदि ऋषिणा ब्रह्मजीवयोः अभेदः प्रतिपादितः। वेदान्तशिरोमणिना शङ्कराचार्येण विविधासूपनिषित्सु आत्मा एव ब्रह्म अर्थात् द्वयोः अभेदः प्रतिपादितः। परवर्तिकाले तत्त्वमसीतिवेदान्तमहावाक्यानामाधारीकृत्य अद्वैतवादिनः शङ्कराचार्याः ब्रह्मजीवयोः अभेदः प्रचारप्रारयन्ति स्म। जीवात्मा हि निर्विशेषचैतन्यमुच्यते। आत्मा कर्तृत्वभोक्तृत्वरहिते सति उपाधिकारणात् कर्तृत्वभोक्तृत्वादिकमारोप्यते। उपाधिनिरासे जीव एव ब्रह्म तयोः अभेदः विराजते। इति शम्।

## Endnotes

1. पैङ्गलोपनिषत्-1/12
2. वेदान्तसारः-10
3. अध्यात्मोपनिषत्-22
4. ब्रह्मसूत्रे शाङ्करभाष्यम्-1/1/12
5. तत्रैव-1/2/20
6. तत्रैव-1/4/22
7. पैङ्गलोपनिषत्-3/2
8. तत्रैव
9. तत्रैव
10. तत्रैव
11. तत्रैव-3/3
12. अध्यात्मोपनिषत्-15
13. पैङ्गलोपनिषत्-3/4
14. तत्रैव-3/3
15. तत्रैव-4/15

## Bibliography


- गैरोला, वाचस्पति, वैदिक साहित्य और संस्कृति,चौखम्बा संस्कृत प्रतिष्ठान,दिल्ली,२०१६
- गोस्वामी, नारायणचन्द्र, सांख्यतत्त्वकौमुदी, संस्कृत पुस्तक भाण्डार, कलिकाता,१४१८ वङ्गाब्दः
- घटक,पञ्चानन, सांख्यदर्शनम् (१), प्रग्रेसिभ पाबलिशर्स,कलकाता, पुनर्मूद्रणम्,२०११
- द्विवेदी, पारसनाथ,वैदिक साहित्य का इतिहास, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२०२०
- ब्रह्मचारी, महानामव्रत, उपनिषद् भावना (प्रथमोभागः), महानामव्रत कालचार्याल एण्ड ओयेलफेयार ट्रास्ट,कलिकाता, द्वितीयसंस्करणम्, १३७१ वङ्गाब्दः
- भट्टाचार्य, अमित, भारतीय दर्शनेर रूपरेखा, संस्कृत बुक डिपो,कलकाता, ३य संस्करण, पुनर्मुद्रण,२०१६
- मुखोपाध्याय, सतीशचन्द्र, उपनिषद् ग्रन्थावली (तृतीयखण्ड), वसुमती साहित्य, कलिकाता, १९९६
- मुखोपाध्याय, सतीशचन्द्र, उपनिषद् ग्रन्थावली (द्वितीयखण्ड) वसुमती साहित्य, कलिकाता, १९९६

- मुखोपाध्याय, सतीशचन्द्र, उपनिषद् ग्रन्थावली (प्रथमखण्डः) ,वसुमती साहित्य, कलिकाता, १९९६
- वन्द्योपाध्याय, हिरण्मय, उपनिषदेर दर्शन, साहित्य संसद,कलकाता,२०१४
- शास्त्री, केशवलाल, उपनिषत्सञ्चयनम् (ईशाद्यष्टोत्तरशतोपनिषदः), ( तृतीयोभागः), चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०२१
- पाण्डेय, शशिकान्त, अद्वैतवेदान्त मे मायावाद, विद्यानिधि प्रकाशन, दिल्ली, 2019
- शास्त्री, केशवलाल, उपनिषत्सञ्चयनम् (ईशाद्यष्टोत्तरशतोपनिषदः), ( द्वितीयोभागः), चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०२१
- शास्त्री, केशवलाल, उपनिषत्सञ्चयनम् (ईशाद्यष्टोत्तरशतोपनिषदः), ( प्रथमोभागः), चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०२१
- Deussen, Paul & Gedon, Rev. A.S.(Trans), The Philosophy of the Upanishads, MLBD, Delhi, 1st ed. 1999, RPt. 2011
- Dasgupta, S.N, A History of Indian Philosophy, Vol. I, Motilal Banarsidass, New Delhi, 2006
- Hiriyanna, M, Outlines of Indian Philosophy, Motilal Banarsidass Publishers, Delhi, 1st Ed.1993, RPt.2005